# READING 17

सौमित्रिविरूपितस्वभगिन्याः शूर्पणखाया रोदनं श्रुत्वा तां तथा शोणितदिग्धशरीरां छिन्नकर्णनासिकां भूमौ पतितां प्रेक्ष्य क्रोधमूर्च्छितः खर एवं पप्रच्छ। केन काभ्यां कैर्वा त्वमेवं विरूपिता। मम जीवतः को महावीरो देवगन्धर्वमानवानामेवंरूपं कर्म कर्तुं धृष्णोति।

निहतस्य मया संख्ये शरसंकृत्तमर्मणः ।
सफेनं मेदिनी रक्तं कस्य वीरस्य पास्यति ॥१॥
कस्य पत्ररथाः कायान्मांसमुत्कृत्य संगताः ।
प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे ॥२॥

ततः सर्वस्मिन्निवेदिते वृत्ते शूर्पणखया खरः परममन्युश्चतुर्दश महाबलानन्तकोपमान्राक्षसानाहूयैवमवोचत् । कौचन मानुषौ शस्त्रसंपन्नौ तापसाम्बरौ दण्डकारण्ये कयाचन प्रमदया सह निवसतः । तेषां वधं कारयित्वेमां मम भगिनीं तेषां शोणितं पाययतेति । एवमुक्ता राक्षसाधिपेन यथाज्ञापयति देव इत्याज्ञामङ्गीकृत्य ते दाशरथेः शौर्यमविज्ञाय मनोवेगेनागच्छन्दाशरथ्याश्रमम् । इमांश्चतुर्दश युगान्तमेघोपमान्राक्षसान्दृष्ट्वा काकुत्स्थो भ्रातरमब्रवीत् ।

मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः ।
यावदेतान्वधिष्यामि ब्रह्मघ्नान्राक्षसान्वने ॥३॥

ततो निशाचरानुवाच

युष्मान्हन्तुमहं प्राप्त ऋषिभिश्च नियोजितः ।
यदि प्राणैरिहार्थो वो निवर्तध्वं निशाचराः ॥४॥

इत्युक्ता महात्मना धैर्यवीर्यसंपन्नेन ते शूलपाणयो राक्षसाः क्रोधाकुलमनस एवमूचुः ।

क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः ।
त्वमेव हास्यसि प्राणानद्यास्माभिर्हतो युधि ॥५॥
का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि ।
अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥६॥

इति ब्रुवाणास्ते संरब्धाश्चिक्षिपुस्तानि शूलानि राघवे परमदुर्जये । स वीरो न क्षणमप्युद्विजमानस्तानि चतुर्दश परिघसन्निभानि शूलानि तावद्भिरि-

षुभिश्चिच्छेद। ततो निशाचराँल्लक्ष्यीकृत्य मुमोच राघवो बाणान् । त इषवो राक्षसानां वक्षांसि वेगेन भित्त्वा वल्मीकानिव सर्पा भूमिं प्रविविशुः । पञ्चत्वं गतेषु निशाचरेषु शूर्पणखातीव त्रस्ता भीता च पुनर्जनस्थानं गत्वा भ्रातरं खरं सर्वं ज्ञापयामास । तन्निशम्य स निशाचरो ऽत्यन्तं कुपितः सन्दूषणं नाम सेनापतिमुद्दिश्य खरः खरवचनमवोचत् ।

चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम् ।
रक्षसां भीमवेगानां समरेष्वनिवर्तिनाम् ॥७॥
नीलजीमूतवर्णानां घोराणां क्रूरकर्मणाम् ।
लोकहिंसाविहारिणां बलिनामुग्रतेजसाम् ॥८॥ सेनां संयोजय

सौम्येति । ततः संप्राप्तायां राक्षससेनायां राघवाश्रमे महद्युद्धमभूत् । अन्ततो रामेणाभिहता निशाचरचमूः सखरदूषणा यथोन्मत्तगजयूथं कुपितसिंहेन । सर्वेषां दण्डकारण्यस्थितानां राक्षसानामेक एवाकम्पनो नाम कथमपि जीवन्दुःखार्तो लङ्कां कथंचित्प्राप्य राक्षसाधिराजं दशग्रीवं वैश्रवणं रावणमुपगम्य खरदूषणविनाशनं निवेदयाञ्चकार ॥